# Shri Ekamukhi Hanumatkavacham

# શ્રીએકમુખી હનુમત્કવચમ્

## Document Information

Text title : ekamukhI hanumatkavacham

File name : ekamukhIhanumatavacha.itx

Category : kavacha, hanumaana, hanuman

Location : doc_hanumaana

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : From brahmANDapurANa?

Latest update : May 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 28, 2021

*sanskritdocuments.org*

# શ્રીએકમુખી હનુમત્કવચમ્

અથ શ્રી એકમુખી હનુમત્કવચં પ્રારભ્યતે ।

મનોજવં મારુતતુલ્યવેગં જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્ ।
વાતાત્મજં વાનરયૂથમુખ્યં શ્રીરામદૂતં શરણં પ્રપદ્યે ॥

var શ્રીરામદૂતં શિરસા નમામિ ॥

શ્રીહનુમતે નમઃ
એકદા સુખમાસીનં શઙ્કરં લોકશઙ્કરમ્ ।
પપ્રચ્છ ગિરિજાકાન્તં કર્પૂરધવલં શિવમ્ ॥

પાર્વત્યુવાચ
ભગવન્દેવદેવેશ લોકનાથ જગદ્ગુરો ।
શોકાકુલાનાં લોકાનાં કેન રક્ષા ભવેદ્ધ્રુવમ્ ॥

સઙ્ગ્રામે સઙ્કટે ઘોરે ભૂતપ્રેતાદિકે ભયે ।
દુઃખદાવાગ્નિસન્તપ્તચેતસાં દુઃખભાગિનામ્ ॥

ઈશ્વર ઉવાચ
શૃણુ દેવિ પ્રવક્ષ્યામિ લોકાનાં હિતકામ્યયા ।
વિભીષણાય રામેણ પ્રેમ્ણા દત્તં ચ યત્પુરા ॥

કવચં કપિનાથસ્ય વાયુપુત્રસ્ય ધીમતઃ ।
ગુહ્યં તે સમ્પ્રવક્ષ્યામિ વિશેષાચ્છૃણુ સુન્દરિ ॥

ૐ અસ્ય શ્રીહનુમત્ કવચસ્ત્રોત્રમન્ત્રસ્ય શ્રીરામચન્દ્ર ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીમહાવીરો હનુમાન્ દેવતા। મારુતાત્મજ ઇતિ બીજમ્ ॥

ૐ અઞ્જનાસૂનુરિતિ શક્તિઃ । ૐ હ્રૈં હ્રાં હ્રૌં ઇતિ કવચમ્ ।
સ્વાહા ઇતિ કીલકમ્ । લક્ષ્મણપ્રાણદાતા ઇતિ બીજમ્ ।
મમ સકલકાર્યસિદ્ધ્યર્થે જપે વીનિયોગઃ ॥

અથ ન્યાસઃ

ૐ હ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ । ૐ હ્રીં તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં મધ્યમાભ્યાં નમઃ । ૐ હ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ હ્રૌં કનિષ્ઠિકાભ્યાં નમઃ । ૐ હ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ૐ અઞ્જનાસૂનવે હૃદયાય નમઃ । ૐ રુદ્રમૂર્તયે શિરસે સ્વાહા ।
ૐ વાયુસુતાત્મને શિખાયૈ વષટ્ । ૐ વજ્રદેહાય કવચાય હુમ્ ।
ૐ રામદૂતાય નેત્રત્રયાય વૌષટ્ । ૐ બ્રહ્માસ્ત્રનિવારણાય અસ્ત્રાય ફટ્ ।

ૐ રામદૂતાય વિદ્મહે કપિરાજાય ધીમહી ।
તન્નો હનુમાન્ પ્રચોદયાત્ ૐ હું ફટ્ સ્વાહા ॥ ઇતિ દિગ્બન્ધઃ ॥

અથ ધ્યાનમ્ ॥

ૐ ધ્યાયેદ્બાલદિવાકરધૃતિનિભં દેવારિદર્પાપહં
દેવેન્દ્રપ્રમુખપ્રશસ્તયશસં દેદીપ્યમાનં રુચા ।
સુગ્રીવાદિસમસ્તવાનરયુતં સુવ્યક્તતત્ત્વપ્રિયં
સંરક્તારુણલોચનં પવનજં પીતામ્બરાલઙ્કૃતમ્ ॥ ૧॥

ઉદ્યન્માર્તણ્ડકોટિપ્રકટરુચિયુતં ચારુવીરાસનસ્થં
મૌઞ્જીયજ્ઞોપવીતારુણરુચિરશિખાશોભિતં કુણ્ડલાઙ્ગમ્ ।
ભક્તાનામિષ્ટદં તં પ્રણતમુનિજનં વેદનાદપ્રમોદં
ધ્યાયેદ્દેવં વિધેયં પ્લવગકુલપતિં ગોષ્પદીભૂતવાર્ધિમ્ ॥ ૨॥

વજ્રાઙ્ગં પિઙ્ગકેશાઢ્યં સ્વર્ણકુણ્ડલમણ્ડિતમ્ ।
નિયુદ્ધકર્મકુશલં પારાવારપરાક્રમમ્ ॥ ૩॥

વામહસ્તે મહાવૃક્ષં દશાસ્યકરખણ્ડનમ્ ।
ઉદ્યદ્દક્ષિણદોર્દણ્ડં હનુમન્તં વિચિન્તયેત્ ॥ ૪॥

સ્ફટિકાભં સ્વર્ણકાન્તિ દ્વિભુજં ચ કૃતાઞ્જલિમ્ ।
કુણ્ડલદ્વયસંશોભિમુખામ્ભોજં હરિં ભજેત્ ॥ ૫॥

ઉદ્યદાદિત્યસઙ્કાશમુદારભુજવિક્રમમ્ ।
કન્દર્પકોટિલાવણ્યં સર્વવિદ્યાવિશારદમ્ ॥ ૬॥

શ્રીરામહૃદયાનન્દં ભક્તકલ્પમહીરુહમ્ ।
અભયં વરદં દોર્ભ્યાં કલયે મારુતાત્મજમ્ ॥ ૭॥

અપરાજિત નમસ્તેઽસ્તુ નમસ્તે રામપૂજિત ।

પ્રસ્થાનં ચ કરિષ્યામિ સિદ્ધિર્ભવતુ મે સદા ॥ ૮॥

યો વારાંનિધિમલ્પપલ્વલમિવોલ્લઙ્ઘ્ય પ્રતાપાન્વિતો
વૈદેહીઘનશોકતાપહરણો વૈકુણ્ઠતત્ત્વપ્રિયઃ ।
અક્ષાદ્યર્ચિતરાક્ષસેશ્વરમહાદર્પાપહારી રણે ।
સોઽયં વાનરપુઙ્ગવોઽવતુ સદા યુષ્માન્સમીરાત્મજઃ ॥ ૯॥

વજ્રાઙ્ગં પિઙ્ગકેશં કનકમયલસત્કુણ્ડલાક્રાન્તગણ્ડં
નાના વિદ્યાધિનાથં કરતલવિધૃતં પૂર્ણકુમ્ભં દૃઢં ચ
ભક્તાભીષ્ટાધિકારં વિદધતિ ચ સદા સર્વદા સુપ્રસન્નં
ત્રૈલોક્યત્રાણકારં સકલભુવનગં રામદૂતં નમામિ ॥ ૧૦॥

ઉદ્યલ્લાઙ્ગૂલકેશપ્રલયજલધરં ભીમમૂર્તિં કપીન્દ્રં
વન્દે રામાઙ્ઘ્રિપદ્મભ્રમરપરિવૃતં તત્ત્વસારં પ્રસન્નમ્ ।
વજ્રાઙ્ગં વજ્રરૂપં કનકમયલસત્કુણ્ડલાક્રાન્તગણ્ડં
દમ્ભોલિસ્તમ્ભસારપ્રહરણવિકટં ભૂતરક્ષોઽધિનાથમ્ ॥ ૧૧॥

વામે કરે વૈરિભયં વહન્તં શૈલં ચ દક્ષે નિજકણ્ઠલગ્નમ્ ।
દધાનમાસાદ્ય સુવર્ણવર્ણં ભજેજ્જ્વલત્કુણ્ડલરામદૂતમ્ ॥ ૧૨॥

પદ્મરાગમણિકુણ્ડલત્વિષા પાટલીકૃતકપોલમણ્ડલમ્ ।
દિવ્યગેહકદલીવનાન્તરે ભાવયામિ પવમાનનન્દનમ્ ॥ ૧૩॥

ઈશ્વર ઉવાચ
ઇતિ વદતિ વિશેષાદ્રાઘવો રાક્ષસેન્દ્રમ્
પ્રમુદિતવરચિત્તો રાવણસ્યાનુજો હ્
રઘુવરવરદૂતં પૂજયામાસ ભૂયઃ
સ્તુતિભિરકૃતાર્થઃ સ્વં પરં મન્યમાનઃ ॥ ૧૪॥

વન્દે વિદ્યુદ્વલયસુભગસ્વર્ણયજ્ઞોપવીતં
કર્ણદ્વન્દ્વે કનકરુચિરે કુણ્ડલે ધારયન્તમ્ ।
ઉચ્ચૈર્હૃષ્યદ્દ્યુમણિકિરણશ્રેણિસમ્ભાવિતાઙ્ગં
સત્કૌપીનં કપિવરવૃતં કામરૂપં કપીન્દ્રમ્ ॥ ૧૫॥

મનોજવં મારુતતુલ્યવેગં જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્ ।
વાતાત્મજં વાનરયૂથમુખ્યં શ્રીરામદૂતં સતતં સ્મરામિ ॥ ૧૬॥

ૐ નમો ભગવતે હૃદયાય નમઃ ।

ૐ આઞ્જનેયાય શિરસે સ્વાહા ।
ૐ રુદ્રમૂર્તયે શિખાયૈ વષટ્ ।
ૐ રામદૂતાય કવચાય હુમ્ ।
ૐ હનુમતે નેત્રત્રયાય વૌષટ્ ।
ૐ અગ્નિગર્ભાય અસ્ત્રાય ફટ્ ।
ૐ નમો ભગવતે અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ આઞ્જનેયાય તર્જનીભ્યાં નમઃ ।
ૐ રુદ્રમૂર્તયે મધ્યમાભ્યાં નમઃ ।
ૐ વાયુસૂનવે અનામિકાભ્યાં નમઃ ।
ૐ હનુમતે કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ અગ્નિગર્ભાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

અથ મન્ત્ર ઉચ્યતે
ૐ ઐં હ્રીં શ્રીં હ્રાં હ્રીં હ્રૂં હ્રૈં હ્રૌં હ્રઃ ।
ૐ હ્રીં હ્રૌં ૐ નમો ભગવતે મહાબલપરાક્રમાય ભૂતપ્રેતપિશાચ
શાકિની ડાકિની યક્ષિણી પૂતનામારી મહામારી
ભૈરવ-યક્ષ-વેતાલ-રાક્ષસ-ગ્રહરાક્ષસાદિકં
ક્ષણેન હન હન ભઞ્જય ભઞ્જય
મારય મારય શિક્ષય શિક્ષય મહામાહેશ્વર રુદ્રાવતાર હું ફટ્ સ્વાહા ।
ૐ નમો ભગવતે હનુમદાખ્યાય રુદ્રાય સર્વદુષ્ટજનમુખસ્તમ્ભનં
કુરુ કુરુ હ્રાં હ્રીં હ્રૂં ઠંઠંઠં ફટ્ સ્વાહા ।
ૐ નમો ભગવતે અઞ્જનીગર્ભસમ્ભૂતાય રામલક્ષ્મણાનન્દકરાય
કપિસૈન્યપ્રકાશનાય પર્વતોત્પાટનાય સુગ્રીવસાધકાય
રણોચ્ચાટનાય કુમારબ્રહ્મચારિણે ગમ્ભીરશબ્દોદયાય
ૐ હ્રાં હ્રીં હ્રૂં સર્વદુષ્ટનિવારણાય સ્વાહા ।
ૐ નમો હનુમતે સર્વગ્રહાનુભૂતભવિષ્યદ્વર્તમાનાન્ દૂરસ્થાન્
સમીપસ્થાન્ સર્વકાલદુષ્ટદુર્બુદ્ધીનુચ્ચાટયોચ્ચાટય પરબલાનિ
ક્ષોભય ક્ષોભય
મમ સર્વકાર્યં સાધય સાધય હનુમતે
ૐ હ્રાં હ્રીં હ્રૂં ફટ્ દેહિ ।
ૐ શિવં સિદ્ધં હ્રાં હ્રીં હ્રૂં હ્રૌં સ્વાહા ।
ૐ નમો હનુમતે પરકૃતાન્ તન્ત્રમન્ત્ર-પરાહઙ્કારભૂતપ્રેતપિશાચ

પરદૃષ્ટિસર્વવિઘ્નદુર્જનચેટકવિધાન્ સર્વગ્રહાન્ નિવારય નિવારય
વધ વધ પચ પચ દલ દલ કિલ કિલ
સર્વકુયન્ત્રાણિ દુષ્ટવાચં ફટ્ સ્વાહા ।
ૐ નમો હનુમતે પાહિ પાહિ એહિ એહિ એહિ
સર્વગ્રહભૂતાનાં શાકિનીડાકિનીનાં વિષં દુષ્ટાનાં સર્વવિષયાન્

આકર્ષય આકર્ષય મર્દય મર્દય ભેદય ભેદય

મૃત્યુમુત્પાટયોત્પાટય શોષય શોષય જ્વલ જ્વલ પ્રજ્જ્વલ પ્રજ્જ્વલ

ભૂતમણ્ડલં પ્રેતમણ્ડલં પિશાચમણ્ડલં નિરાસય નિરાસય
ભૂતજ્વર પ્રેતજ્વર ચાતુર્થિકજ્વર વિષમજ્વર માહેશ્વરજ્વરાન્
છિન્ધિ છિન્ધિ ભિન્ધિ ભિન્ધિ

અક્ષિશૂલ-વક્ષઃશૂલ-શરોભ્યન્તરશૂલ-ગુલ્મશૂલ-પિત્તશૂલ-
બ્રહ્મરાક્ષસકુલ-પરકુલ-નાગકુલ-વિષં નાશય નાશય
નિર્વિષં કુરુ કુરુ ફટ્ સ્વાહા ।
ૐ હ્રીં સર્વદુષ્ટગ્રહાન્ નિવારય ફટ્ સ્વાહા ॥

ૐ નમો હનુમતે પવનપુત્રાય વૈશ્વાનરમુખાય
હન હન પાપદૃષ્ટિં ષણ્ઢદૃષ્ટિં હન હન
હનુમદાજ્ઞયા સ્ફુર સ્ફુર ફટ્ સ્વાહા ॥

શ્રીરામ ઉવાચ
હનુમાન્ પૂર્વતઃ પાતુ દક્ષિણે પવનાત્મજઃ ।
પ્રતીચ્યાં પાતુ રક્ષોઘ્ન ઉત્તરસ્યામબ્ધિપારગઃ ॥ ૧॥

ઉદીચ્યામૂર્ધ્વગઃ પાતુ કેસરીપ્રિયનન્દનઃ ।
અધશ્ચ વિષ્ણુભક્તસ્તુ પાતુ મધ્યે ચ પાવનિઃ ॥ ૨॥

અવાન્તરદિશઃ પાતુ સીતાશોકવિનાશનઃ ।
લઙ્કાવિદાહકઃ પાતુ સર્વાપદ્ભ્યો નિરન્તરમ્ ॥ ૩॥

સુગ્રીવસચિવઃ પાતુ મસ્તકં વાયુનન્દનઃ ।
ભાલં પાતુ મહાવીરો ભ્રુવોર્મધ્યે નિરન્તરમ્ ॥ ૪॥

નેત્રે છાયાઽપહારી ચ પાતુ નઃ પ્લવગેશ્વરઃ ।
કપોલકર્ણમૂલે તુ પાતુ શ્રીરામકિઙ્કરઃ ॥ ૫॥

નાસાગ્રે અઞ્જનાસૂનુર્વક્ત્રં પાતુ હરીશ્વરઃ ।
વાચં રુદ્રપ્રિયઃ પાતુ જિહ્વાં પિઙ્ગલલોચનઃ ॥ ૬॥

પાતુ દન્તાન્ ફાલ્ગુનેષ્ટશ્ચિબુકં દૈત્યપ્રાણહૃત્ ।
var ઓષ્ઠં રામપ્રિયઃ પાતુ ચિબુકં દૈત્યકોટિહૃત્
પાતુ કણ્ઠં ચ દૈત્યારિઃ સ્કન્ધૌ પાતુ સુરાર્ચિતઃ ॥ ૭॥

ભુજૌ પાતુ મહાતેજાઃ કરૌ તુ ચરણાયુધઃ ।
નખાન્નખાયુધઃ પાતુ કુક્ષિં પાતુ કપીશ્વરઃ ॥ ૮॥

વક્ષો મુદ્રાપહારી ચ પાતુ પાર્શ્વે ભુજાયુધઃ ।
લઙ્કાવિભઞ્જનઃ પાતુ પૃષ્ઠદેશે નિરન્તરમ્ ॥ ૯॥

નાભિઞ્ચ રામદૂતસ્તુ કટિં પાત્વનિલાત્મજઃ ।
ગુહ્યં પાતુ મહાપ્રાજ્ઞઃ સૃક્કિણી ચ શિવપ્રિયઃ ॥ ૧૦॥

ઊરૂ ચ જાનુની પાતુ લઙ્કાપ્રાસાદભઞ્જનઃ ।
જઙ્ઘે પાતુ મહાબાહુર્ગુલ્ફૌ પાતુ મહાબલઃ ॥ ૧૧॥

અચલોદ્ધારકઃ પાતુ પાદૌ ભાસ્કરસન્નિભઃ ।
પાદાન્તે સર્વસત્વાઢ્યઃ પાતુ પાદાઙ્ગુલીસ્તથા ॥ ૧૨॥

સર્વાઙ્ગાનિ મહાવીરઃ પાતુ રોમાણિ ચાત્મવાન્ ।
હનુમત્કવચં યસ્તુ પઠેદ્વિદ્વાન્ વિચાક્ષણઃ ॥ ૧૩॥

સ એવ પુરુષશ્રેષ્ઠો ભક્તિં મુક્તિં ચ વિન્દતિ ।
ત્રિકાલમેકકાલં વા પઠેન્માસત્રયં સદા ॥ ૧૪॥

સર્વાન્ રિપૂન્ ક્ષણે જિત્વા સ પુમાન્ શ્રિયમાપ્નુયાત્ ।
મધ્યરાત્રે જલે સ્થિત્વા સપ્તવારં પઠેદ્યદિ ॥ ૧૫॥

ક્ષયાઽપસ્મારકુષ્ઠાદિતાપત્રયનિવારણમ્ ।
આર્કિવારેઽશ્વત્થમૂલે સ્થિત્વા પઠતિઃ યઃ પુમાન્ ॥ ૧૬॥

અચલાં શ્રિયમાપ્નોતિ સઙ્ગ્રામે વિજયી ભવેત્ ॥ ૧૭॥

યઃ કરે ધારયેન્નિત્યં સ પુમાન્ શ્રિયમાપ્નુયાત્ ।
વિવાહે દિવ્યકાલે ચ દ્યૂતે રાજકુલે રણે ॥ ૧૮॥

ભૂતપ્રેતમહાદુર્ગે રણે સાગરસમ્પ્લવે ।
દશવારં પઠેદ્રાત્રૌ મિતાહારી જિતેન્દ્રિયઃ ॥ ૧૯॥

વિજયં લભતે લોકે માનવેષુ નરાધિપઃ ।
સિંહવ્યાઘ્રભયે ચાગ્નૌ શરશસ્ત્રાસ્ત્રયાતને ॥ ૨૦॥

શ઼ૃઙ્ખલાબન્ધને ચૈવ કારાગ્રહનિયન્ત્રણે ।
કાયસ્તમ્ભે વહ્નિદાહે ગાત્રરોગે ચ દારૂણે ॥ ૨૧॥

શોકે મહારણે ચૈવ બ્રહ્મગ્રહવિનાશને ।
સર્વદા તુ પઠેન્નિત્યં જયમાપ્નોત્યસંશયમ્ ॥ ૨૨॥

ભૂર્જે વા વસને રક્તે ક્ષૌમે વા તાલપત્રકે ।
ત્રિગન્ધેનાથવા મસ્યા લિખિત્વા ધારયેન્નરઃ ॥ ૨૩॥

પઞ્ચસપ્તત્રિલૌહૈર્વા ગોપિતં કવચં શુભમ્ ।
ગલે કટ્યાં બાહુમૂલે વા કણ્ઠે શિરસિ ધારિતમ્ ॥ ૨૪॥

સર્વાન્ કામાનવાપ્નોતિ સત્યં શ્રીરામભાષિતમ્ ॥ ૨૫॥

ઉલ્લઙ્ઘ્ય સિન્ધોઃ સલિલં સલીલં યઃ શોકવહ્નિં જનકાત્મજાયાઃ ।
આદાય તેનૈવ દદાહ લઙ્કાં નમામિ તં પ્રાઞ્જલિરાઞ્જનેયમ્ ॥ ૨૬॥

ૐ હનુમાનઞ્જનાસૂનુર્વાયુપુત્રો મહાબલઃ ।
શ્રીરામેષ્ટઃ ફાલ્ગુનસખઃ પિઙ્ગાક્ષોઽમિતવિક્રમઃ ॥ ૨૭॥

ઉદધિક્રમણશ્ચૈવ સીતાશોકવિનાશનઃ ।
લક્ષ્મણપ્રાણદાતા ચ દશગ્રીવસ્ય દર્પહા ॥ ૨૮॥

દ્વાદશૈતાનિ નામાનિ કપીન્દ્રસ્ય મહાત્મનઃ ।
સ્વાપકાલે પ્રબોધે ચ યાત્રાકાલે ચ યઃ પઠેત્ ॥ ૨૯॥

તસ્ય સર્વભયં નાસ્તિ રણે ચ વિજયી ભવેત્ ।
ધનધાન્યં ભવેત્તસ્ય દુઃખં નૈવ કદાચન ॥ ૩૦॥

ૐ બ્રહ્માણ્ડપુરાણાન્તર્ગતે નારદ અગસ્ત્ય સંવાદે ।
શ્રીરામચન્દ્રકથિતપઞ્ચમુખે એકમુખી હનુમત્ કવચમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com
(The kavacha is not to be found in brahmANDapurANa although
it is attributed so in the colophone.)

*Shri Ekamukhi Hanumatkavacham*

pdf was typeset on May 28, 2021

Please send corrections to *sanskrit@cheerful.com*